दिनाङ्क:-28.01.2026

प्रात: - 06:55

अथ वार्ताः

प्रधानमन्त्री-वार्ता

भारत-यूरोपीय-सङ्घौ मुक्त-व्यापार-अनुबन्धस्योपरि हस्ताक्षरं कृतवन्तौ। अयं अनुबन्धः गतदिने नवदिल्ल्यां प्रधानमन्त्रिणः नरेन्द्रमोदिनः, यूरोपीय-परिषदः अध्यक्षस्य एण्टोनियो कोस्टा इत्यस्य सहैव यूरोपीय-आयोगस्य अध्यक्षायाः उर्सुला वॉन डेर लेयेन इत्यस्याः च मध्ये सम्मेलन-वार्तायाः अनन्तरं सम्पन्नः।

अनेन तावत् भारतीय-श्रम-प्रधान-वस्तूनां कृते, यथा वस्त्राणि उपानहः इत्येतेषां कृते यूरोपीय-विपण्यश्च उद्घटिष्यन्ते । सहैव अनेन वाहनानि, मद्यं, औषधानि एवं आयातयोग्यानि यूरोपीय-वस्तूनि मितव्ययिनः भविष्यन्ति। एतदतिरिच्य, भारत-यूरोपीय-सङ्घौ सुरक्षा, रक्षा-सहभागिता, गतिशीलता, आपत्प्रबन्धनं समेत्य हरित-हाइड्रोजनक्षेत्रेषु नैकान् अनुबन्धान् हस्ताक्षारितवन्तौ । संयुक्त-वार्ताहर-सम्मेलनं सम्बोधयन् प्रधानमन्त्री प्रावोचत् यत्, भारतस्य सहैवसप्तविंशतिदेशानां यूरोपीय-सङ्घस्य मध्ये विशालतमस्य व्यापारानुबन्धस्य कारणात् आर्थिक-सम्बन्धाः सुदृढाः भविष्यन्ति, वृत्यवसराः उत्पत्स्यन्ते, वैश्विक-आपूर्ति-शृङ्खला बलयुक्ता भविष्यति।

यूरोपीय-परिषदः अध्यक्षः एण्टोनियो कोस्टा स्वकथने अवदत् यत्, अनेन शिखर-सम्मेलनेन विश्वस्मै स्पष्टः सन्देशः प्रेषितः यत् यदा वैश्विक-परिवर्तनं जायमानमस्ति, तदा भारत-यूरोपीय-सङ्घौ सामरिक-विश्वसनीय-सहयोगिरूपेण एकत्र तिष्ठतः।

राष्ट्रिय-पुरस्कार-समारोहस्य

पञ्चायतीराजमन्त्रालयः, शिक्षामन्त्रालयः, जनजातीयकार्यमन्त्रालयः च अद्य नवदेहल्याम् आदर्श-युवा-ग्रामसभायाः विजेतृणां सम्मानार्थं संयुक्तरूपेण राष्ट्रिय-पुरस्कार-समारोहस्य आयोजनं कुर्वन्तः सन्ति। पञ्चायतीराजराज्यमन्त्री प्रो. एस. पी. सिङ्घ् बघेलः, शिक्षा-राज्यमन्त्री डा. सुकान्त मजूमदारः च अस्मिन् अवसरे समुपस्थितौ भविष्यतः

राष्ट्रपति द्रौपदी मुर्मू

अद्य संसद: आयव्यय-सत्रस्य आरम्भो भविष्यति। लोकसभायाः राज्यसभायाः च सत्रं राष्ट्रपति द्रौपदी मुर्मू वर्यायाः भाषणेन आरम्भो भविष्यति। आर्थिकसमीक्षायाः प्रस्तुतीकरणं गुरुवासरे भविष्यति, आयव्ययस्य प्रस्तुतिकरणं च फरवरी मासस्य एक दिनाङ्के रविवासरे भविष्यति। आयव्यय-सत्रस्य प्रथमं चरणं अद्यारभ्य फेब्रवरीमासस्य त्रयोदश दिनाङ्कपर्यन्तं भविष्यति। द्वितीयं चरणं मार्च्-मासस्य नव दिनाङ्कात् एप्रिल्-मासस्य द्वि दिनाङ्कपर्यन्तं भविष्यति। सत्रे त्रिंशत् उपवेशनानि भवन्ति।

भारत-ऋतु विज्ञान

भारत-ऋतु विज्ञान विभागेन, अद्य दिल्ली, हरियाणा, चण्डीगढ, हिमाचलप्रदेशः, पञ्जाब् इत्येतेषु प्रदेशेषु शीतलतरङ्गस्य पूर्वानुमानं कृतम् अस्ति। दिल्ली, बिहार, हरियाणा, चण्डीगढ, हिमाचलप्रदेशः, मध्यप्रदेशः, पञ्जाब्, राजस्थानम्, उत्तरप्रदेश् इत्येतेषु प्रदेशेषु अपि नीहाराच्छादनं भविष्यति इति -विभागेन पूर्वानुमानितम् अस्ति।

राजनाथ-आयव्यय

नवदिल्ल्याः संसदभवन-परिसरे संसद: आयव्यय-सत्रात् पूर्वं सर्वदलीय-सभा प्रचलिता। रक्षामंत्री राजनाथसिंहः अस्या: सभायाः अध्यक्षः आसीत्। राज्यसभायाः सदनाध्यक्षः जे. पी. नड्डाः, संसदीयकार्यमन्त्री किरेन रिजिजू, संसदीयकार्यराज्यमन्त्री अर्जुनराम मेघवालः, डा. एल. मुरुगन च सभायां उपस्थिताः आसन्। काङ्ग्रेस-नेता जयराम रमेशः, डी. एम. के-नेता तिरुचि शिवः, तृणमूल-काङ्ग्रेस-नेता सागरिका घोषः, समाजवादी-दलस्य सांसदः रामगोपाल यादवः अपि उपस्थिताः आसन्।

।इति वार्ता:।।